

अथश्रीमद्भागवतसप्तमस्कंधचूर्णिकाप्रारंभः





श्रीगणेशायनमः श्रीमत्कुलदेवतायैनमः अथसप्तमस्कंधोव्याख्यायते राजोवाच हेब्रह्मन् भगवान् सर्वभूतानां
प्रियः समश्चसन् इंद्रस्यार्थेकथंदैत्यानवधीत् परमात्मनः निर्गुणस्यदेवैः अर्थोनदैत्यैः सहद्वेषोपिन एवंसतिकथंदैत्यनाशः अतए
वभगवद्गुणान्प्रतिमहान् संशयोजातः तच्छेत्तुमर्हसि श्रीशुकउवाच हेमहाभागत्वयाहरेः चरितंसाधुपृष्टम् यत्र भागवत
माहात्म्यंनारदादिभिः परमंपुण्यंगीयते अतः कृष्णांमुनिंनत्वाहरेः कथांकथयिष्ये भगवान्निर्गुणोऽपिस्वमायागुणमाविश्यबाध्य
बाधकतांगतः हेनृप सत्वंरजस्तमइतिप्रकृतेः गुणाः तेषांयुगपत् ह्रासोनवृद्धिरपिन सत्वोत्कर्षकालेदेवादीनांवृद्धिः रजउत्कर्षेदैत्या
नाम् तमसःउत्कर्षेयक्षरक्षसाम् भगवान् तत्तत्कालानुगुणोभवति किंच यदाजीवस्यभोगार्थंपुरः स्रष्टुंइच्छति तदारजोवर्द्ध-
यति यदाक्रीडितुमिच्छति तदासत्वंयदासंहर्तुमिच्छतितदातमः हेराजन् अजः प्रधानपुरुषसहकारित्वेनस्वाश्रयभूतंचरंतंका
लंस्वयमेवसृजति हेनृप अयंकालः सत्वगुणोत्कर्षकृत् अतःदेवानीकंवर्द्धयति सुरप्रतिपक्षान् हिनस्ति एवंकालशक्तिक्षुभित-
गुणगतंवैषम्यंतदधिष्ठातरि स्फुरति अतः तयोःक्रूरपक्षपातेनवधोन किंतु ब्रह्मशापेनदैत्ययोनिंप्राप्तयोःअनुग्रहार्थमेवव
धः कृतः हेनृपएतद्विषये महाक्रतौपृच्छतेयुधिष्ठिरायपूर्वंसुरर्षिणाइतिहासः उदाहृतः तंशृणु अथराजसूयेमहाक्रतौश्रीकृष्णे
शिशुपालस्यसायुज्यंदृष्ट्वातत्रमुनीनांशृण्वतांयुधिष्ठिरः नारदंउवाच अहोएकांतभक्तानामपिदुर्लभामोक्षाप्तिः साशत्रोःशि
शुपालस्यकथंप्राप्ता एतत् ज्ञातुंइच्छामः किंच भगवन्निंदयावेनःद्विजैः नरकेपातितः शिशुपालदंतवक्त्रौतु आबाल्यात् कृष्ण
द्वेष्टारौ असकृत् विष्णुंशपतोः तयोःजिह्वायांकुष्ठंनोत्पन्नंनरकंचनविविशतुः एवंसतिकथंसायुज्यंप्राप्तौ एतद्विषयेमेमनो
भ्राम्यति तत्रकारणंब्रूहि श्रीशुकउवाच राज्ञःवचः श्रुत्वा नारदउवाच हेयुधिष्ठिरईश्वरस्यतुवैषम्यंनास्ति अतः

ओ॰ ६ हिरण्याक्षहिरण्यकशिपयोः

वैरानुबंधेन भयेन स्नेहात् कामेन वा हरौ मनः युंज्यात् यथा कीटः भ्रमरेण रुद्धः तं अनुस्मरन् तद्रूपं विंदते तथा भगवति मनो युंज
न् पुमान् सायुज्यं प्राप्नोति किंच द्वेषादिभिः ईश्वरे मनः स्थाप्य बहवः तद्गतिं प्राप्ताः ते च गोप्यः कामात् भयात् कंसो द्वेषाच्चैद्याद
यो नृपाः संबंधात् वृष्णयः स्नेहात् यूयं भक्त्या वयं विभो एषु मध्ये वेनः कतमोपि न तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्
शिशुपालदंतवक्त्रौ तु विष्णुपार्षदौ विप्रशापात् पदच्युतौ युधिष्ठिर उवाच वैकुंठवासिनोर्हरिदासयोः कीदृशः कस्य
वा शापो जातः नारद उवाच एकदा सनकादयः यदृच्छया वैकुंठं जग्मुः तदा द्वास्थौ तान् शिशून् मत्वा न्यषेधताम् तदा ते
क्रुद्धाः संतः ऊचुः हे द्वास्थौ युवां अत्र वासं कर्तुं न चार्हथः अतः आसुरीं योनिं यातम् इति अशपन् एवं शप्तौ तत् स्थानात् पतंतौ
कृपालुभिः तैः पुनः प्रोक्तौ युवां त्रिभिर्जन्मभिः स्वं लोकं आयं कल्पताम् तौ हिरण्यकशिपुहिरण्याक्षौ जातौ नृसिंहरूपिणा हरि
णा ज्येष्ठो हतः सूकररूपेण हिरण्याक्षो हतः हिरण्यकशिपुः हरिभक्तं पुत्रं प्रह्लादं जिघांसुः नानायातनाः कृत्वा हंतुं नाशक्नुत् त
तस्तौ रावणकुंभकर्णौ जातौ तौ रामः अवधीत् हे धर्म तस्य वीर्यं मार्कंडेयमुखात् श्रोष्यसि तावेव शिशुपालदंतवक्त्रौ कृष्णाच्च
क्र हतां हसौ शापमुक्तौ भूत्वा पुनः पार्षदौ जातौ युधिष्ठिर उवाच विष्णुभक्ते पुत्रे विद्वेषः कुतः आसीत् प्रह्लादस्य हरिभक्तिः
कथं आसीत् तत् सर्वं ब्रूहि ४६ इति सप्तमे प्रथमः १ नारद उवाच क्रोडमूर्त्तिना हरिणा हिरण्याक्षे हते सति क्रुद्धः हिरण्य
कशिपुः सदसि शूलं उद्यम्य दानवान् अब्रवीत् भो दानवदैतेयाः मद्वचः शृणुत तथैव आशु क्रियताम् मत्सपत्नैर्देवैः हरिणा मे भ्राता घा
तितः अतः तं हरिं हत्वा तद्रक्तेन यावत् भ्रातरं तर्पयिष्यामि तावत् भुवं यात तत्र तपोयज्ञादियुक्तान् द्विजान् घातयत एवं कृते द्विजक्रि
यामूलो विष्णुः नश्येत् किंच यत्र यत्र द्विजा गावो वेदा वर्णाश्रमाः क्रियाः तं तं जनपदं यात संदीपयत वृश्चत इति भर्तृगदितं श्रुत्वा तथा प्र-
ओ॰ ७ अयं शापः समाप्यताम्॰

जानाशंचक्रुः किंच पुरग्रामादीन्ददहुः केचित्खनित्रैः सेतुप्राकारादीन् बिभिदुः केचित् आजीव्यान् वृक्षान् चिच्छिदुः एवंदैत्यैः उ-
पद्रुतेलोके सति देवाः दिवंत्यक्त्वागुप्ताः संतः भुविचेरुः ततः हिरण्यकशिपुः मृत भ्रातुः पारलौकिकं कृत्वाततः पत्नीं रुषाभानुंपुत्रान् श
कुनि शंबरादीन्दितिंच सांत्वयन् उवाच हिरण्यकशिपुरुवाच हे अंबहेवधूः हेपुत्राः वीरंमाशोचथ शूराणांवधः रिपोरभिमु
खेश्लाघ्यएव अत्रभूतानांसंवासः प्रपायामिवास्ति आत्मातुनित्यः देहसंबंधस्तु मायाकृतः तस्मात् मायाकृतं सर्वंमिथ्या इतिज्ञात्वामा
शोचत अत्रइतिहासंशृणुत उशीनरेषुसुयज्ञोनामराजाअभूत् सः युद्धेशत्रुभिर्घातितः तंज्ञातयः आवृत्यस्थिताः तदाशरनिर्भिन्न
हृदयंशयानंध्वस्ताक्षंछिन्नायुधभुजंएवंभूतंपतिं दृष्ट्वातत्स्त्रियः दुःखिताः करैः उरोघ्नंत्यः उच्चैः रुदंत्यः सत्यः विलेपिरे अहोनिर्द
येनब्रह्मणात्वंइदृशींदशांगमितः हेराजन् त्वयासुहृत्तमेनविना वयंकथंजीवेम हेवीर यत्रत्वं यास्यसितत्र अनुगमनेनः आज्ञांदे-
हि एवंमृतंपतिंप्रगृह्यविलपतीनांतस्यदाहार्थंनयनंअनिच्छतीनांसतीनांसूर्यास्तंजातम् तदायमः तत्परिदेवितंश्रुत्वाबालकरूपे
णतत्रागत्यतान्बोधयामास यमउवाच अहोवयसाऽधिकानांअमीषांमोहंपश्यत जीवः यस्मादागतः तत्रैवगतः तंस्वयंस
धर्माअपिव्यर्थंशोचंति अहोवयंयुष्मत्तोधन्याः अथपितृभ्यांत्यक्ताः बालाअपिवृकादिभिः अभक्ष्यमाणाः संतः वयंनविचिंत-
यामः कुतः यः गर्भेरक्षति सएवसर्वत्ररक्षिता हे अबलाः ईश्वरेणईक्षितः अनाथोपिवनेजीवति तेनोपेक्षितः गृहेगुप्तोऽपिनजीवति
किंच पथिच्युतंवस्तुदिष्टरक्षितंतिष्ठति गृहेस्थितमपिईश्वरेच्छयानश्यतितद्वत् अतःशोकोनकार्यः हेमूढाः यंशोचथसः अयंसु
यज्ञः शेते यः श्रोता यः वक्तासः कर्हिचित्नदृश्येत सएवआत्मादेहाद्भिन्नः शोच्योनभवति किंच यस्तिहदेहेंद्रियैस्तत्तदर्थद्रष्टाआत्मा- २
सतु प्राणदेहाभ्यांअन्यएवसन् उच्चावचान्देहान् भजतिविवेकबलेनउत्सृजतिच आत्मनोदेहधर्मभाक्त्वंतुमाययायुज्यते त-

स्मात् नित्यं आत्मानं अनित्यं देहं ज्ञानिनः न शोचंति स्वयंस धर्मेति यदुक्तं तत्रेतिहासमाह वने कश्चित् लुब्धकः कणादिभिः प्र-
लोभयन् जालं विस्तार्य पक्षिणः धृतवान् एवं कृतवति तत्र विचरन् कुलिंगमिथुनं दृष्ट्वा तयोर्मध्ये कुलिंगीं प्रलोभ्य जालसूत्रेण दधा
र तां बद्धां दृष्ट्वा कुलिंगः मोक्तुमसमर्थः वृक्षं आश्रित्य विलापं चकार अहो देवः अकरुणः दीनया स्त्रिया किं करिष्यति मामपि का-
मं नयतु विधुरा युषा किं प्रयोजनम् मातृहीनान् बालान् कथं बिभर्मि एवं विलपंतं कुलिंगं लुब्धकः गुप्तः सन् शरेण विव्याध एवं
यूयं स्वमृत्युं अपश्यंत्यः शोचंत्यः वर्षशतैरपि एनं पतिं न प्राप्स्यथ हिरण्यकशिपुरुवाच इत्युक्त्वा यमः अंतरधीयत सु
यज्ञस्य ज्ञातयः पारलौकिकं चक्रुः तस्मात् यूयं माशोचत नारदउवाच एवं स स्नुषादितिः हिरण्यकशिपोर्वाक्यं श्रुत्वा पु
त्रशोकं त्यक्त्वा तत्त्वे चित्तं अधारयत् ६१ इतिसप्तमेद्वितीयः २ नारदउवाच हे युधिष्ठिर हिरण्यकशिपुः आत्मानं
अजेयं अजरामरं शत्रुहीनं कर्तुमिच्छन् ऊर्ध्वबाहुः नभोदृष्टिः पादांगुष्ठाश्रिता वनिः सन् मंदरद्रोण्यां दारुणं तपः तेपे तदा देवास्त्व
स्थानानि भेजिरे बहुकालकृततपसा तस्य मूर्ध्नः सधूमोऽग्निः उत्थितः तेन त्रैलोक्यं अतपत् समुद्राः चक्षुभुः द्वीपाद्रिभिः सह-
भूश्चचाल सग्रहास्तारा निपेतुः दिशः जज्वलुः तेनाग्निना तप्ताः देवाः दिवं त्यक्त्वा ब्रह्मलोकं गत्वा धात्रे विज्ञापयामासुः हे देवदेव दै
त्येंद्र तपसा तप्ताः वयं दिवि स्थातुं न शक्नुमः हे भूमन् लोकाः यावन्न नंक्ष्यंति तावत्तस्य उपशमं यदि मन्यसे तर्हि विधेहि हे ब्रह्मन्
तव किमपि अविदितं न तथापि विज्ञापयामहे एवं तस्य संकल्पोस्ति यथा ब्रह्मा तपोयोगनिष्ठया सत्यलोकं अधितिष्ठति तथा
अहमपि तपोयोगादिना आत्मनः विधास्यामि किंच इदं विश्वं सुराक्षरादिव्यत्ययेन विधास्यामि पुण्यपापव्यत्यासं च करोमि
एवं त्वत्पदग्रहणे तस्य विनिर्बंधं शुश्रुम अतः अत्र यत् युक्तं तत् अनंतरमेव विधत्स्व हे ब्रह्मन् तवासनं तु द्विजगवां सुखाय-

वर्तते अतः तदुपशमं आशुकुरु एवं दैवैर्विज्ञापितः ब्रह्मा तदाश्रमं भृग्वादिभिः सह ययौ तत्र वल्मीकतृणकीचकैः प्रतिच्छन्नं तं प्र-
थमं न ददर्श पश्चात् पिपीलिकादिभिः भक्षितमेदस्त्वङ्मांसशोणितं तपसा लोकान् तपंतं तं दैत्यं कथंचित् आलक्ष्य विस्मितः सन् प्रा
ह ब्रह्मोवाच हे काश्यप उत्तिष्ठोत्तिष्ठ त्वं तपःसिद्धोऽसि अहं वरदः प्राप्तः ईप्सितो वरः व्रीयताम् हे दैत्य दंशभक्षितदेहस्य
ते प्राणाः अस्थिषु शेरते एवं ते धैर्यं मया दृष्टम् नैनत्पूर्वर्षयः चक्रुः न चापरे करिष्यंति शतं दिव्यसमाः निरंबुः प्राणान् कः धारयेत्
अनेन व्यवसायेन त्वया जितोऽहम् मद्दर्शनं ते निष्फलं न अतः वरम् वृणीष्व नारद उवाच एवमुक्त्वा ब्रह्मा कमंडलु-
जलेन तं प्रोक्षितवान् ततः सः सर्वावयवसंपन्नः युवा वल्मीकादुत्थितः सन् खे स्थितं ब्रह्माणं दृष्ट्वा शिरसा भूमौ प्रणम्य प्रांज-
लिः सन् अस्तौत् हिरण्यकशिपुरुवाच हे देव त्वं तमसा व्याप्तं इदं जगत् प्रकटं कृतवान् किंच इदं त्वमेव पासि सृजसि
हरसि रजःसत्वतमसां आश्रयाय परमेश्वराय तेनमः हे विभो त्वं चराचरस्य जगतां नियंता असि किंच त्वमेव त्रय्यातन्वाय-
ज्ञान् विस्तारयसि त्वमेव कालः सन् जनानां आयुः क्षिणोषि किंच कार्यकारणादि सर्वं त्वद्व्यतिरिक्तं नास्ति वेदोपवेदादयोऽ
पि तवैव तनवः संति किंच इदं कार्यं तव शरीरं त्वं स्वरूपे एव स्थितः सन् येन शरीरेण विषयान् भुंक्षे अतस्त्वं ब्रह्मैवासि तस्मै
भगवते नमः इत्यादि एवं स्तुत्वा वरं प्रार्थयते हे वरदोत्तम यदि वरान् दास्यसि तर्हि त्वद्विसृष्टभूतेभ्यः मे मृत्युर्मा भूत् अंतः
न बहिर्न दिवा न नक्तं न त्वत्सृष्टव्यतिरिक्तान्न आयुधैः न भूमौ न अंबरे न नरैः न मृगैः न अप्राणैः न सप्राणैः न सुरासुरोरगैः मे मृ
त्युर्मा भूत् किंच देहिनां ऐकपत्यम् लोकपालानां महिमानम् यथा तव महिमानं च देहि तथा अणिमाद्यैश्वर्यं च देहि ३८ इ ३
ति सप्तमे तृतीयः ३ नारद उवाच ब्रह्मा एवं वृतः तत्तपसा प्रीतः सन् दुर्लभान् वरान् दत्त्वा तेन पूजितः सन् सत्यलोकं ज-

गाम हिरण्यकशिपुः लब्धवरः हेममयं वपुः बिभ्रत् भ्रातुर्वधं स्मरन् भगवति द्वेषं अकरोत् ततः लोकत्रयं देवदैत्यगंधर्वादीन् ऋषि पितृपतिमन्वादीन् सर्वसत्वपतीन् जित्वा वशं आनीय लोकपालानां स्थानैश्वर्यादीनि जहार देवोद्यानश्रियाजुष्टं त्रैलोक्यलक्ष्म्याय तनं इंद्रभवनं अधिवसतिस्म तस्मिन् महेंद्रभवने रुद्रादिभिर्वंदितचरणः सन् रेमे हे अंग मद्येन मत्तं तं ब्रह्मविष्णुरुद्रैर्विनाइंद्रा दयः देवाः दैत्यगंधर्वसिद्धविद्याधरयक्षराक्षसादयः एते सर्वे उपायनयुक्त पाणिभिः उपासत स एव वर्णाश्रमवद्भिः कृते यज्ञादि भिः इज्यमानः हविर्भागान् अग्रहीत् तस्य अकृष्टपच्या मही आसीत् द्यौः कामदुघा आस समुद्राः रत्नौघान् ददुः नद्यः घृतदुग्धा दीन् ऊहुः पर्वताः क्रीडास्थानं ददुः द्रुमाः सर्वर्तुषु पुष्पफलादीन् दधुः लोकपालानां पृथक् गुणान् एक एव दधार एवं सः त्रैलोक्यै श्वर्यं भुंजन् नातृप्यत् ऐश्वर्यमत्तस्य तस्य महान् कालः अगात् तस्य उग्रदंडसंविग्नाः सर्वे लोकाः सपालकाः विनिद्राः वायुभोजनाः संतः अच्युतं शरणं गत्वा उपतस्थुः तदा साधूनां अभयंकरी आकाशवाणी अभवत् हे देवाः मा भैष्ट वः भद्रम् तस्य दौरात्म्यं ज्ञातं तच्छांतिं करिष्यामि तावत्कालं प्रतीक्षत यदा देवेषु वेदेषु गोषु विप्रेषु साधुषु धर्मे मयि च विद्वेषः स्यात् वा आशु विनश्यति किंच यदा निर्वैराय स्वसुताय महते प्रह्लादाय द्रुह्येत् तदा वरोर्जितमपि तं हनिष्ये नारद उवाच इत्युक्ता देवाः तं प्रणम्य न्यव र्तंत असुरं हतं च मेनिरे तस्य दैत्यपतेः पुत्राः ४ आसन् तेषु प्रह्लादः गुणैर्महान् आसीत् किंच ब्रह्मण्यः सत्यसंधः सर्वप्रियः सुहृत्तमः विषयेषु निस्पृहः गुरुषु ईश्वरभावनः नियतेंद्रियः किंच यस्य वासुदेवे स्वाभाविकी मतिः यः बालोपि न्यस्तक्रीडनकः कृष्णग्रहगृहीतात्मा ईदृशं जगत् न वेद आसीनः पर्यटन् अश्नन् शयानः प्रपिबन् ब्रुवन् नानुसंधत्त एतानि गोविंदपरिरंभितः क्व चित् गोविंदचिंतया रुदति हसति गायति नृत्यति इत्यादि हरिपादारविंदसेवया सत्संगलब्धया भक्त्या आत्मनः सुखं तन्वन् अन्यस्य म

नसोपिशांतिं व्यधात् ईदृशोभगवद्भक्ते पुत्रेदैत्यः द्रोहंअकरोत् युधिष्ठिरउवाच हे देवर्षे कृष्णायस्वपुत्रायनत्पिताकुतः द्रोहं
अकरोत् एतद्वेदितुमिच्छामः विप्रतिकूलानपिपुत्रान् पितरः शिक्षार्थंनिंदंति परंतुनघ्नंति एवंसतिपुत्रद्वेषः पितुर्मरणाय कथंजा-
तः एतत् कौतूहलंअपाकुरु ४६ इतिसप्तमेचतुर्थः४ नारदउवाच असुरैः पौरोहित्याय काव्योवृतः तस्यपुत्रौशंडामर्कौरा-
जगृहांतिके न्यवसताम् तौप्रह्लादंअन्यबालकांश्चपाठयामासतुः ताभ्यांप्रोक्तं द्वैतशास्त्रंशुश्रुवे पपाठच परंतु साधुनमेने एकदा
दैत्येंद्रः पुत्रं अंकमारोप्य पप्रच्छ हेवत्सत्वंयत्साधुमन्यसे तत् उच्यताम् प्रह्लादउवाच हे दैत्यवर्य आत्मपातं गृहंहित्वा वनंग
त्वा हरिं आश्रयेत एतत् साधुमन्ये एवंपुत्रगिरः श्रुत्वाहसित्वा गुरून् उवाच अस्यधीः विष्णुपक्षैः यथानभिद्येत तथास्वगृहे बालःधा
र्यताम् ततोदैत्ययाजकाः प्रह्लादंगृहमानीय प्रशस्यतं अपृच्छंत हेप्रह्लाद सत्यंकथय बालानतिक्रम्यते बुद्धिविपर्ययः कुतः किंच
ते बुद्धिभेदः परकृतः स्वतो वा एतद्वद प्रह्लादउवाच परः स्वः इतिअज्ञानंयस्यमायया भवतांदृष्टम् ममतुन तस्मै भगवतेनमः
यस्यजिज्ञासायां ब्रह्मादयोपिमुह्यंति सः मेबुद्धिंभिनत्ति यथा अयस्कांतस्य सांनिध्यात् लोहंभ्रमति तथाचक्रपाणेः इच्छयामेचे
तः भिद्यते एवमुक्त्वाविरराम तदाराजसेवकः कुपितः सन् तं निर्भर्त्स्य उवाच अरे वेत्रंआनीयतां कुलांगारस्य अस्यदमः उदितः सः
क्रियते दैतेयचंदनवनेजातोयं कंटकद्रुमः यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोर्भकः एवंतं भीषयन् त्रिवर्गप्रतिपादकशास्त्रं अ-
ध्यापयामास ततोगुरुः ज्ञातज्ञेयचतुष्टयं एनंज्ञात्वा दैत्येंद्रं दर्शयामास ततः पादयोः पतितं बालं आलिंग्य अंकमारोप्य इदंआह
हिरण्यकशिपुरुवाच हेप्रह्लाद एतावताकालेन गुरोः यत् स्वधीतं तद्उच्यताम् प्रह्लादउवाच श्रवणंकीर्तनंविष्णोः स्म ४
रणंपादसेवनम् अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनम् इतिनवलक्षणा भक्तिः विष्णौसमर्प्यते इतियत् तत् उत्तमं अधीतं-

ओ॰ ६ लोहचुंबकस्य॰ ओ॰ ५ कशा॰ ओ॰ ४ दैत्यवनोत्पन्नेकुठाररूपस्य विष्णोः दंडरूपः अयम्॰ ओ॰ ३ सामदानादि॰

मन्ये नारदउवाच एवंपुत्रवचःश्रुत्वाक्रोधेनगुरुंउवाच हेब्रह्मबंधोमेपुत्रः किंअसारंग्राहितः गुरुपुत्रउवाच हेइंद्रश
त्रोतवसुतःअयंमत्प्रणीतंनवदति अस्यइयंनैसर्गिकीमतिरस्ति अतःमन्युंनियच्छ मयिदोषंमाकृथाः नारदउवाच एवंगु
रूक्तंश्रुत्वापुत्रंउवाच हेपुत्रइयंतेबुद्धिःगुरुमुखान्नचेत् तर्हिअसतीकुतःप्राप्ता प्रह्लादउवाच हेपितःश्रीकृष्णेमतिःपरतः
स्वतोवासत्समागमंविनानोत्पद्यते नारदउवाच इत्युक्त्वाउपरतंपुत्रंस्वोत्संगात् महीतलेनिरस्य राक्षसान् उवाच हेराक्षसाः
अयंवध्यताम् यःपितृव्यहंतुःविष्णोःपादौदासवत् अर्चति योयंपंचहायनः पित्रोःसौहृदंजहौ अतःअयंसर्वैःउपायैःहंतव्यःतदाते
राक्षसाःभर्त्राआदिष्टाः छिंधिभिंधीतिवादिनःसंतःशूलैःतंमर्मसु अघ्नन् तथापिमहाभागवतेब्रह्मणिसमाहितात्मनिप्रह्ला
देतेषांप्रहाराःनिष्फलाःआसन् तस्मिन्प्रयासेनष्टेसति दैत्येंद्रःतद्वधोपायान् चकार दिग्गजैःदंदशूकैःअभिचारैःगिरिशृंगात्
अधःपातैःमायाभिःअद्रादिषुनिरोधैःगरदानैःअभोजनैःहिमवाय्वग्निसलिलैःपर्वताक्रमणैः एतैरुपायैःनिष्पापंसुतंहं
तुंनशशाक तदादीर्घचिंतांप्राप्तःआह मयाएषः असाधुउक्तः वधोपायाश्चकृताः तथापिस्वतेजसामुक्तः किंच मत्समीपेनि
र्भयोवर्तते अतःअस्यविरोधेनमेमृत्युर्भविता इतिचिंतया अधोमुखंतं एकांतेशंडामर्कौऊचतुः त्वयाजगत्त्रयंजितंतवतु
चिंत्यंनपश्यामः एनंवरुणपाशैर्बध्वायावद्भार्गवःआगमिष्यति तावन्निधेहि राजातथेत्युक्त्वाइदमब्रवीत् अस्यराज्ञांधर्माः
उपदेष्टव्याः तदागुरूत्रिवर्गोपपादकंशास्त्रंदैत्यबालकैःसहतंअध्यापयताम् गुरुशिक्षितंसः साधुनमेने किंच यदाआचार्यः
गृहमेधीयकर्मसु क्वचित् अन्यत्रगतः तदालब्धावसरैर्बालकैः क्रीडार्थंउपहूतःप्रह्लादः बालकान्प्रत्याहूयउवाच हेराजेंद्रते-
बालाःप्रह्लादस्यगौरवात् त्यक्तक्रीडनकाःसंतःतंपर्युपासत ततोमहाभागवतःप्रह्लादःतान्बालानाह ५७ इति-

ओ॰६॰गुरुपंयथातथा॰

सप्तमे पंचमः ५ प्रह्लाद उवाच हे बालकाः प्राज्ञाः कौमारे एव भगवद्धर्मानाचरेत् इह मानुषं जन्म दुर्लभम् अतः विष्णोः
पादोपसर्पणं योग्यम् हे दैत्याः विषयसुखं तु सर्वत्र लभ्यते अतस्तदर्थं यत्नो न कार्यः यतः तेन वृथा आयुर्व्ययो भवति संसारं
प्राप्तः पुमान् यावच्छरीरं न नश्येत् तावत् क्षेमाय यतेत किंच अजितात्मनः पुंसः वर्षशतं आयुः तत्र अर्द्धं निष्फलं यतः असौ-
रात्र्यां शेते मुग्धस्य क्रीडतः बाल्ये कौमारे विंशति वर्षाणि याति ७० जरया ग्रस्तदेहस्य विंशति वर्षाणि याति ९० शेषं गृहे सक्त-
स्य अर्थचिंतया कामेन मोहेन च याति एवं गृहे सक्तं आत्मानं मोचयितुं कः उत्सहेत किंच प्राणहानिं अंगीकृत्य द्रव्यं साधयति त
स्मिन्नर्थे तृष्णां को नु विसृजेत् किंच स्त्रीपुत्रगृहादीन् स्मरन् सन् अवितृप्तकामः कथं विरक्तः स्यात् किंच कुटुंबपोषणार्थं क्षीय-
माणायुः पुमान् पुरुषार्थी ग्रहतं न मन्यते अत एव तापत्रयेण दुःखितचित्तोपि विषयेषु दुःखबुद्धिं न करोति किंच वित्तहर्तुः इहा-
मुत्र दंडनरकरूपं दोषं विद्वानपि कुटुंबी परवित्तं हरत्येव इत्थं कुटुंबं पुष्णन् सन् आत्मविचाराय न कल्पते यतः कश्चिदपि स्वमा-
त्मानं मोचितुं न समर्थस्तस्मात् हे दैत्याः विषयात्मकेषु दैत्येषु संगं त्यक्त्वा मुक्तसंगैः सह संगम्य नारायणं शरणं व्रजत हे दैत्यबाल
काः अच्युतं प्रीणयतः पुंसः बह्वायासो न कुतः सर्वभूतानां आत्मत्वात् किंच यः ब्रह्माद्यणवंतपदार्थेषु परमात्मा व्याप्य स्थितः त
स्मात् आसुरं भावं उन्मुच्य सर्वभूतेषु दयां सौहृदं च कुरुत दयया अधोक्षजः तुष्यति अनंते तुष्टे तच्चरणजुषां नः अलभ्यं किम् ए
तत् ज्ञानं नारायणः नारदाय आह एकांतभक्तानां पादरजसा स्नातानां सर्वेषामपि इदं ज्ञानं स्यात् न तु उच्चानामेवेति नियमः इदं भ
गवद्धर्मरूपं ज्ञानं मया पूर्वं नारदात् श्रुतम् दैत्यपुत्रा ऊचुः वयं त्वं च अन्यं गुरुं न विद्महे अतः पुरस्थस्य बालस्य तव महत्संगः
कथं जातः इति नः संशयं छिंधि ३० इति सप्तमे षष्ठः ६ नारद उवाच एवं दैत्यसुतैः पृष्टः प्रह्लादः मम पूर्वानुभाषि

तंस्मरन्तान् उवाच प्रह्लादउवाच अस्मत्पितरि तपसे मंदराचलं प्रस्थिते सति देवाः दानवान् प्रतियुद्धोद्यमं चक्रुः तदा असुराः देवबलोद्योगं दृष्ट्वा कलत्रादि सर्वं त्यक्त्वा दिशः प्रदुद्रुवुः ततो देवाः राज्ञः आवासं व्यलुंपन् इंद्रस्तु मम मातरं गृहीत्वानीतवान् तां नीयमानां भयोद्विग्नां पथि दृष्ट्वा नारदः इंद्रं प्राह हे इंद्र एनां सतीं नेतुं नार्हसि मुंच मुंच एवमुक्तः इंद्रः नारदं उवाच हे ऋषे अस्याः जठरे अविषह्यं वीर्यं आस्ते अतः प्रसवोत्तरं तं हत्वा एनां मोक्ष्ये नारदउवाच हे इंद्र अयं महाभागवतः अनंतानुचरः त्वया संस्थां न प्राप्स्यते इत्युक्तः इंद्रः तां विहाय दिवं ययौ ततो नारदः मे मातरं आश्वास्य निजाश्रमं आनीय यावत् ते भर्तुरागमः तावत् इह उष्यतां इत्याह सा अंतर्वत्नी इच्छाप्रसूतये गर्भक्षेमाय च ऋषिं पर्यचरत् कारुणिकः ऋषिः मां उद्दिश्य तस्याः धर्मस्य तत्त्वरूपां भक्तिं ज्ञानं च प्रादात् तत्तु बहुकालत्वात् स्त्रीत्वाच्च मातुः तिरोदधे ऋषिकृपया मां अधुनापि स्मृतिर्न जहाति अतः यदि मम वचः श्रद्दधते तर्हि भवतामपि भक्तिर्ज्ञानं च भवेत् अथ नारदोक्तं देहात्मविवेकप्रकारं दर्शयति जन्माद्याः षट् भावाः देहस्य दृष्टाः आत्मनः न आत्मा तु नित्यः अव्ययः शुद्ध इत्यादिलक्षणैः देहात् भेदं ज्ञात्वा देहादौ अहं ममेति मिथ्याबुद्धिं त्यजेत् किंच जाग्रत्स्वप्नसुषुप्तिवृत्तयः बुद्धेर्भवंति ताः येन अनुभूयंते सः साक्षी पुरुषः संसारस्तु बुद्धिद्वारकः अज्ञानमूलः अतः तस्मात् ईश्वरे सर्वकर्मनाशकः योगः कर्तव्यः मिथ्याभूतोपि स्वप्न इव भ्यते यैर्धर्मैर्भगवति रतिः भवति अयमुपायो भगवताउक्तः तत्रैव अंतरंगान् धर्मानाह गुरुशुश्रूषया भक्त्या च ईश्वराराधनेन च तत्कथायां श्रद्धया च ईश्वरे रतिर्भवति भगवद्भक्तेर्लिंगान्याह हरेर्गुणान् श्रुत्वा उत्पुलकः सन् यदा अश्रूणि मुंचति रौति नृत्यति किंच गतत्रपः सन् हरे नारायण जगत्पते इति वक्ति तदा मुक्तबंधनः सन् अधोक्षजं प्राप्नोति तदेव मोक्षसुखं बुधाः विदुः अतः ईश्वरं भजध्वम् हे दैत्यबालकाः हृत्स्थस्य हरेर्भजने कोतिप्रयासो-

स्ति किंच द्रव्यकलत्रादयः एते मर्त्यस्य कियत्प्रियं कुर्वंति यथा द्रव्यपुत्रकलत्रादिकं इहलोकसुखं नश्वरम् एवं पुण्यार्जितं
स्वर्गादिकमपि नश्वरं तस्मात् आत्मलब्धये भक्त्या हरिं भजत किंच अयं नरः यत्संकल्प्य कर्माणि करोति तद्विपरीतं फलं प्राप्नो
ति तदेवाह इह कर्मिणः सुखाय संकल्पोस्ति परं च इच्छया दुःखं प्राप्नोति किंच यदर्थं कामान् कामयते सः देहस्तु पारक्यो यदा
तदा स्त्रीपुत्रादयः पारक्या इति किं वक्तव्यम् किंच आत्मनः नश्वरैः एतैः किम् किंच हे असुराः क्लिश्यमानस्य देहिनः कर्मभिः
कियान् अर्थ इति कथ्यतां किंच अयं देही देहं कर्म च ज्ञानेनैव नश्नुते तस्मात् अर्थादयो यदधीनाः तं हरिं भजध्वम् नः असुराणां हरि
भजने अनधिकारः इति न च वाच्यम् देवोऽसुरो मनुष्यो वा यक्षो गंधर्व एव च भजन् मुकुंदचरणं स्वस्तिमान् स्याद्यथा वयम् १ नालं
द्विजत्वं देवत्वमृषित्वं वा सुरात्मजाः प्रीणनाय मुकुंदस्य न वृत्तं न बहुज्ञता २ न दानं न तपो नेज्या न शौचं न व्रतानि च प्रीयतेऽमल
या भक्त्या हरिरन्यद्विडंबनम् ३ ततो हरौ भगवति भक्तिं कुरुत दानवाः आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे ४ दैतेया यक्ष
रक्षांसि स्त्रियः शूद्रा व्रजौकसः खगा मृगाः पापजीवाः संति ह्यच्युततां गताः एतावानेव लोकेऽस्मिन्पुंसः स्वार्थः परः स्मृतः एकां
त भक्तिर्गोविंदे यत्सर्वत्र तदीक्षणम् ५५ इति सप्तमे सप्तमः ७ नारद उवाच अथ सर्वे दैत्यसुताः निर्दोषं प्रह्लादवाक्यं
जगृहुः गुरुशिक्षितं न अथाचार्यसुतः बालकानां प्रत्यङ्निष्ठां बुद्धिं आलक्ष्य भीतः सन् राज्ञे शीघ्रं न्यवेदयत् राजा तत् अप्रि
यं श्रुत्वा कोपावेशेन चलद्गात्रः पुत्रं हंतुं मनो दधे बद्धांजलिं स्थितं पुत्रं पापेन चक्षुषा अवलोकयन् आह हे दुर्विनीत हे अधम म
च्छासनातिगं त्वां अद्य यमसादनं नेष्ये यस्य मे क्रुद्धस्य सतः त्रयो लोकाः कंपंते तस्य मे शासनं कस्य बलेन अतिक्रांतवान् ६
नारद उवाच इति श्रुत्वा हरेः प्रियः प्रह्लादः प्रहसन् इव गतभीः उवाच हे राजन् सः केवलं मम बलं न किंतु भवतः अपरेषां

बलिनांचबलम् येनब्रह्मादयोवशंनीताः सः ईश्वरः इदं सृजति अवति अत्ति त्वंआसुरंस्वभावंजहि मनः समंधत्स्व अजितात् मन-
सः विनाअन्येविद्विषोनसंति किंच सर्वत्रसाम्येनमनसोधारणंतदेवअनंतस्यसमर्हणंभवतीत्यादि राजोवाच हेमंदा
त्मन् निश्चितंत्वंमर्तुकामोसि यः त्वं अमर्यादंविकत्थसे हेमंदभाग्यत्वयामदन्यः जगदीश्वरः उक्तः असौ क्वास्ति यदिसर्वत्रवर्तते
तर्हिकस्मात् स्तंभेनदृश्यते प्रह्लादः तंस्तंभंनिरीक्ष्यमाणः नमस्यन्नाह दृश्यतेइति अरेकत्थमानस्यतेशिरः हरामि त्वांहरिःअ
द्यगोपायेत एवंदुरुक्तैः सुतंअर्दयन् खड्गंप्रगृह्यसिंहासनात् उत्पत्यस्वमुष्टिनास्तंभंतताड ततः स्तंभेअति भीषणः शब्दः अ-
भूत् येन अंडकटाहं अस्फुटत् तंश्रुत्वाब्रह्मादयः स्वस्थाननाशंमेनिरे सः दैत्यः सभामध्येअपूर्वनादंश्रुत्वातस्याश्रयंनददर्श ना
देनसर्वेदैत्याः वितत्रसुः तदाभगवान् स्तंभंविदार्य दृश्योबभूव निजभृत्यभाषितंतथा अखिलभूतेषुआत्मनोव्याप्तिंतथाच
सनकादिभिः यत् भाषितं शापमोक्षो भवत्विति तदपिसत्यंकर्तुंनमृगंनमानुषंअद्भुतंरूपंदधत् सन् सभायांस्तंभेअदृश्यत
सः दैत्यः एवंधनिंश्रुत्वा तदाश्रयंविलोकयन् स्तंभमध्यात् निर्गच्छंतंनृमृगेंद्ररूपंदृष्ट्वा नायंमृगः नापिनरः अहोएतत् किंइति
अतर्कयत् एवंतस्यतर्कयतः सतः अग्रतः नृसिंहरूपः हरिः समुत्थितः तदातप्तस्वर्णलोचनंकरालदंष्ट्रंगिरिकंदरवत् प्रसृतास्य
नासंस्तब्धोर्ध्वकर्णंदिविस्पृशत्कायंनखायुधंईदृशंनृसिंहंदृष्ट्वा आह अहोमहामायिनाहरिणाअयंममवधोपायः चिंतितः अ-
स्तुतथा अनेनकिम् एवंब्रुवन् दैत्यकुंजरः तंअभ्यपतत् तदानृसिंहतेजसि अग्नौपतंगइव अदृष्टोभूत् ततोदैत्यः नृसिंहंगदयाअ
भ्यअहनत् तदैवनृहरिणागृहीतः सन् हस्तात् निसृत्यखड्गचर्मणीप्रगृह्यवेगेनतंअभ्यपद्यत तदाहरिः अट्टहासंकृत्वायथाव्या
लः आखुंगरुडः अहिंतथातंसभायांद्वारिऊरौनिपात्यतस्यहृदयंसंध्यायांनखैर्विददार ततः संरंभदुःप्रेक्ष्यकराललोचनोव्या-

ताननरक्तं विलिहन् स्वजिह्वया असृक्कलवाक्तारुणकेसराननो यथांत्रमाली द्विपहत्यया हरिः तथा अशोभत ततः मृतं तं विसृज्य उदायु
धान् तस्य अनुचरान् नरवशस्त्र पार्ष्णिभिः अहन् तदा तस्य सटाभिः कंपिताः मेघाः व्यशीर्यंत तद्दृष्ट्या गृहाः निष्प्रभाः अभवन् श्वा-
सहताः समुद्राः चुक्षुभुः तस्य रंहसा शैलाः उत्पेतुः तत्तेजसा खं दिशः न रेजिरे ततः सभायां नृपासने उपविष्टं विभुं भयात् कोऽपि ना-
सेवत तदा हरिणा त्रिलोकशत्रुं हतं दृष्ट्वा सुरस्त्रियः पुष्पैः हरिं ववृषुः विमानावलिभिः आकाशं संकुलं आस देवदुंदुभयो नेदुः
अप्सरसः ननृतुः गंधर्वाः जगुः तत्र ब्रह्मेंद्र गिरिशादयः ऋषयः पितरः सिद्धाः विद्याधराः महोरगाः गंधर्वाप्सरसः मनवः प्रजापत
यः चारणाः यक्षाः किंपुरुषादयः विष्णुपार्षदाश्च मूर्ध्नि बद्धांजलिपुटाः संतः सिंहासने आसीनं तं उपव्रज्य ईडिरे ब्रह्मोवा-
च हे अनंत ते दुरंतशक्तये नमोऽस्तु रुद्र उवाच हे भगवन् अयं अल्पः असुरो हतः इत उत्तरं कोपस्य कारणं नास्ति अतः
एनं उपसृतं तत्सुतं पाहि इत्यादि इंद्र उवाच हे नृहरे अस्मान् रक्षता भवता स्वभागाः दैत्यात् प्रत्याहृताः इत उपरि क्रोधं उप
संहर ऋषय ऊचुः हे नृहरे त्वं नः यत्तपः आत्थ तत् येन विकुंठितं तं दैत्यं हत्वा पुनरपि तपः कुरु ते तेन अनुज्ञातवान् असि-
तस्मै तेन नमः पितर ऊचुः नः पुत्रैः दत्तानि श्राद्धानि यः बुभुजे तस्य दैत्यस्य उदरात् तानि पिंडोदकानि यः त्वं आहृतवान् त-
स्मै ते नमः सिद्धा ऊचुः हे नृसिंह यः नः गतिं अहार्षीत् तं दैत्यं भवान् नखैर्विददार तस्मै ते नमः विद्याधरा ऊचुः यः नः वि
द्यां न्यषेधत् सः दैत्यः भवता युद्धे हतः तं त्वां प्रणताः स्म नागा ऊचुः येन नः स्त्रीरत्नानि च हृतानि तत् वक्षः पाटनेनास्मां दत्तानंद
नमोऽस्तु ते मनव ऊचुः तव आज्ञाकारिणो वयं येन परिभूताः सः त्वया हतः हे प्रभो नः शाधि प्रजापतय ऊचुः हे सत्व
मूर्ते येन वयं प्रजासर्गे निषिद्धाः सः दैत्यः त्वया हतः सन् शेते अतः परं प्रजाः सृजामः गंधर्वा ऊचुः हे विभो त्वदीयाः वयं येन स्व

वशेकृताः सः त्वया मृतिं नीतः योग्यमिदम् चारणाऊचुः हे हरे यतः एषः दैत्यः त्वया हतः अतः वयं त्वत्पदं प्राप्ताः यक्षाऊचुः
हे पंचविंशवयं दैत्येन वाहकत्वं प्रापिताः सः त्वया मृत्युं नीतः किंपुरुषाऊचुः वयं किंपुरुषाः त्वं ईश्वरः त्वया अयं कुपुरुषो हतः
वैतालिकाऊचुः हे भगवन् वयं तव यशो गीत्वा संपदं लभामहे तां संपदं यः व्यनैषीत् सः त्वया हतः एतद्दिष्ट्या किन्नराऊचुः
हे हरे तवानुगाः वयं दितिजेन विष्टिंकारिताः सः त्वया हतः हे नृसिंह त्वं नः समृद्धये भव विष्णुपार्षदाऊचुः हे भगवन् लोकानां
मंगलं इदं अद्भुतं नृसिंहरूपं अद्यैव दृष्टम् न तु पूर्वं हे ईश सोयं ते किंकरः विप्रशप्तः तस्येदं निधनं अनुग्रहाय विद्मः ५६ इति स
समेअष्टमः ८ नारदउवाच एवं दूरतः स्थित्वा स्तुवंतः ब्रह्माद्याः देवाः तत्समीपे गंतुं न अशकन् तदा देवैः प्रेषिता श्रीः तत्
अद्भुतं रूपं दृष्ट्वा अदृष्टाश्रुतपूर्वत्वात् शंकिता सती तत्समीपं न जगाम तदा ब्रह्मा समीपे स्थितं प्रह्लादं आह हे तात स्वपित्रे कुपि-
तं प्रभुं प्रशमय इत्युक्त्वा तं प्रेषयामास ततः प्रह्लादः तथेत्युक्त्वा शनकैः उपेत्य विधृतांजलिः सन् भुवि कायेन ननाम देवः स्वपाद-
मूले पतितं अर्भकं विलोक्य कृपया परिप्लुतः तं उत्थाप्य तच्छीर्ष्णि करांबुजं दधौ ततः भगवत् करस्पर्शात् विधूताखिलाशुभः
तत्पादपद्मे हृदि दधन् एकाग्रमनसा हरिं अस्तौत् प्रह्लादउवाच ब्रह्मादयः सुरगणाः मुनयः सिद्धाः वचसां प्रवाहैः आरा
धितुं न शक्ताः सः हरिः उग्रजातेः मम कथं संतोषं प्राप्तुं अर्हति किंच धनम् सत्कुले जन्म सौंदर्यं तपः पांडित्यं इंद्रियनैपुण्यं कांतिः
प्रतापः शारीरं बलं उद्यमः प्रज्ञा अष्टांगयोगः एते द्वादशापि गुणाः ईश्वरस्य आराधनाय न भवंति यतः केवलया भक्त्यैव हरिः गजें
द्राय तुष्टो भवत् एतैर्द्वादशगुणैर्युक्तादपि नारायणपादारविंदविमुखात् विप्रात् श्वपचं भक्तियुक्तं वरिष्ठं मन्ये यतः सः सर्वं कुलं पु
नाति विप्रः आत्मानमपि न अतो हीनः किंच अहं नीचोपि यथामति ईश्वरस्य महिमानं वर्णयामि येन पुमान् पूयेत हे नृसिंह सर्वे

ओ॰ २ पंचविंशतितत्वनियामकः ओ॰ ४ निर्मूल्यकर्म॰

अमीब्रह्माद्याः उद्विजंतः तव भक्ताः संति नत्ववयमिव वैर भावेन किंतु श्रद्धयाते रुचिरावतारैः क्रीडाविश्वस्य क्षेमाद्यर्थम् नतुभयो
त्पादनाय अतः मन्युंनियच्छ यदर्थंअयंमन्युः सच असुरः अधुनैव हतः लोकाश्च सुखंप्राप्ताः संतः क्रोधोपसंहारं प्रतीक्षंते सर्वे एत
द्रूपं भयनिवृत्त्यर्थंस्मरंति हे अजित तेइदंरूपंदृष्ट्वा अहंनबिभेमि हेदीनदयालो स्वकर्मभिबद्धः संसारात् भीतः अहं एवं भूतं मांत
वांघ्रि कमलंप्रति कदा आह्वयसे यस्मात् प्रियाप्रियादि संयोगवियोगाभ्यांदह्यमानः सन् सकलयोनिषु भ्रमामि अतस्तन्नि-
स्तारोपायंदास्ययोगंवद हे भूमन् अहंत्वद्दासः सन् तवलीलाकथाः अनुगृणन् महादुःखानि नगणयिष्यामि सः त्वंसंसारात्मके
मनोरूपेचक्रे निष्पीड्यमानं अतएवप्रपन्नं मांस्वसमीपंनय हेनृहरे अहं भोगपरिपाकंविद्वान् आविरिंच्यान् भोगान् अणिमा
दिसिद्धीरपिनेच्छामि किंच कर्णप्रियाः आशिषः क्व रोगाणांउत्पत्तिस्थानं कलेवरं क्व एवंविद्वानपिजनः विरक्तोनभवति किंच
अहंरजः प्रभवः क्व तवकृपा क्व यतः सकलसंतापहरः प्रसादः मेशिरसि अर्पितः किंच हेनारसिंह यथात्वयाऽनुकंपितोस्मि एवं-
नारदेन पूर्वंअनुगृहीतः सोहंकथंनुत्वद्भृत्यसेवांविसृजामि हे अनंत मत्प्राणरक्षणं मत्पितुर्वधश्च एतद्द्वयंत्वयाकृतंतत् स्वभृत्य
वाक्यंसत्यंकर्तुंमन्ये किंच त्वमेव एकः एतत्जगत्सृष्ट्वा तदनु प्रविष्टः सन् नानेवप्रतीयसे किंच इदंकार्यकारणात्मकंजगत् त्व
मेव नत्वत्तः पृथक् त्वंनु ततोन्यः अतः अयंस्वः अयंपर इतिबुद्धिर्व्यर्थैव किंच यः त्वंप्रलये इदंजगत् आत्मनिनिक्षिप्यनिष्क्रियः स
न् प्रलयोदके शेषे तस्यैव तवनाभेः सकाशात् लोकपद्मं अभूत् तत्संभवो ब्रह्मा पद्मादन्यत् अपश्यमानः त्वांसंतमपिनापश्यत्
तदाविस्मितः ब्रह्मापद्मंआस्थितः सन् आत्मनिसहस्रमुखांघ्रिशिर आद्यवयवैर्युक्तंत्वां दृष्ट्वामुदंआप तदात्वं हयग्रीवमूर्तिंधृ ८
त्वामधुकैटभौदैत्यौहत्वा तस्मैब्रह्मणेश्रुतिगणान्समर्पितवान् एवंत्वंराममत्स्याद्यवतारैः लोकान्धर्मंचपालयसि दुष्टान् हं

सिच किंच हे विकुंठनाथ हर्षशोकादिभिः आर्तंकामातुरं इदं मम मनः तवकथासु न प्रीयते मनसि एवं भूते सति कथं तत्त्वं विचारयामि किंच मां जिह्वा एकतः विकर्षति शिश्नोन्यतः त्वगुदरं श्रवणं च कुतश्चित् घ्राणः अन्यतः क्वच चपलदृक् क्वच कर्मेंद्रियाणि एवं सपत्न्यः पतिमिव मां त्रोटयंति हे नित्यमुक्त एवं भव वैतरिण्यां पतितं जनं वैतरणीमुत्तार्य पाहि हे विभो अस्योत्तारणे अखिलगुरोस्ते कोपि प्रयासोस्ति किंच हे सर्वोत्तम वैतरण्याः सकाशात् अहं नोद्विजे किंतु त्वत्कथाविमुखान् जनान् शोचामि किंच एतान् कृपणान् विहाय एक एवाहं मुक्तिं नेच्छामि किंच अस्य जनस्य शरणं त्वत्तोन्यं न पश्यामि हे पुरुष मौनव्रतादयः मोक्षहेतवोपि अजितेंद्रियाणां जीवनोपायाः भवंति किंच एते कार्यकारणे एव ते रूपे अत्र योगिनः त्वां पश्यंति दारुषु अग्निमिव किंच हे हरे भूतानि ५ मात्राः ५ प्राणादि च मनो वचोभ्यां प्रकाशितं सर्वं त्वमेवासि एते गुणाद्यभिमानिनो देवाः निरुपाधिं त्वां न विदंति एवं विचार्य विद्वांसः अध्ययनादिव्यापाराद् उपरमंति किंच हे उरुगाय अयं जनः प्रणिपात १ स्तुति २ सर्वकर्मार्पण ३ परिचर्या ४ चरणस्मृति ५ कथाश्रवण ६ रूपया षडंगसेवया विना त्वयि भक्तिं कथं लभेत यस्मात् भक्तिं विना न मोक्षः सेवया विना न भक्तिः अतः त्वद्दास्ययोगमेव देहि नारद उवाच भक्तेन एतावत् वर्णितगुणः यत मन्युः प्रीतः नृहरिः प्रह्लादं अभाषत हे प्रह्लाद ते भद्रं अहं ते प्रीतः अभीष्टं वरं वृणीष्व जनानां मे दर्शनं दुर्लभम् जंतुः मां दृष्ट्वा पुनः दुःखं प्राप्तुं नार्हति नारद उवाच

इति लोकप्रलोभनैः वरैः प्रलोभ्यमानोपि एकांतभक्तित्वात् प्रह्लादः वरान् नैच्छत ५५ इति सप्तमे नवमः ९ नारद उवाच प्रह्लादः वरप्रदानादिकं भक्तियोगस्य विघ्नमिति ज्ञात्वा हृषीकेशं उवाच हे नृहरे अहं मुमुक्षुः त्वां उपाश्रितः अतः मां वरैः मा प्रलोभय किंच अहं अकामः त्वद्भक्तः त्वं च निरभिसंधिः स्वामी अतः आवयोः प्रयोजनं राजसेवकयोरिव न हे वरदर्षभ

यदिमेवरान् दास्यसि तर्हि हृदिकामांकुराणां अनुत्पत्तिं वरं वृणे मानवः मनः स्थितान् कामान् यदामुंचति तर्ह्येव भगवत्त्वाययो
ग्योभवति भगवतेअद्भुतसिंहायतुभ्यंनमः नृसिंहउवाच मेएकांतभक्ताः आशिषः नैववांछंति अथापि एतत् मन्वंतरं दैत्ये
श्वराणांभोगान् भुंक्ष्व मदीयाः कथाः जुषमाणः सर्वभूतस्थंमांआत्मनि आवेश्य योगेन मांयजस्व किंच पुण्यपापक्षयंकुर्वन् कालज
वेन इदं कलेवरंहित्वा अत्रशुद्धांकीर्तिं विस्तार्यमुक्तबंधः सन् मांप्राप्स्यसि हे प्रह्लादत्वांमांचइदं मच्चरितंत्वयागीतं एतत् स्तोत्रंचयः
स्मरन् कीर्तयेत् सः नरः कर्मबंधात् मुच्यते प्रह्लादउवाच हे हरे मेपितातवतेजः अविद्वान् भ्रातृहेति मृषादृष्टिः सन् त्वांअनिं-
दत् तस्मात् सः पूयेत इमं अन्यं वरं वृणे श्रीभगवानुवा॰ हे वत्स तेपिता एकविंशतिपितृभिः सहपूतः यतः यस्यकुलेत्वंसाधुर्जा-
तः किंच हे प्रह्लाद यत्रयत्रमद्भक्ताः वसंतिते कीकटाअपिदेशाः शुद्धाः भवंति किंच येपुरुषाः त्वांअनुगताः तेपिमद्भक्ताभवंति अतः त्वं
मद्भक्तानांमध्येश्रेष्ठोसि अथत्वंपितुः प्रेतकार्याणिकुरु पित्र्यंच स्थानमातिष्ठत्वंमत्परः सन् कर्माणिकुरु श्रीशुकउवाच हेरा-
जन् प्रह्लादोपिपितुः सांपरायिकंचक्रे तदाब्रह्माप्रसन्नंदेवंदृष्ट्वाप्राह हे देवत्वयाअसुरोहतः एतद्भद्रं महाभागवतः अयंअर्भकः मृ
त्योर्मोचितः इदमपिभद्रम् श्रीनृसिंहउवाच हे पद्मसंभवत्वया असुराणांएवंवरोनदेयः यथा अहीनांअमृतम् नारदउ-
वाच इत्युक्त्वाभगवान् अंतर्दधे ततः प्रह्लादः ब्रह्मादीन् संपूज्यववंदे ततोब्रह्माकाव्यादिभिर्मुनिभिः दैत्यदानवानांपतिं प्रह्लादं
अकरोत् ततोब्रह्मा द्याः स्वस्थानानि ययुः एवंतौविष्णोः पार्षदौदितेः पुत्रत्वं प्रापितौ हरिणा हतौ पुनः कुंभकर्णदशग्रीवौ राक्षसौ
जातौतौ रामविक्रमैः हतौ तावेव इह पुनः शिशुपालकरूषजौजातौतौ वैरानुबंधेन तवपश्यतः सतः हरौसमीयतुः हे राजन् दम ९
घोषसुतादीनांद्विषांहरेः सात्म्यंकथं इतित्वं पृष्टवान् तदाख्यातं किंच श्रीकृष्णस्यश्रीनृसिंहावतारस्य कथाप्रह्लादस्यचरितंभ-

ओ·१ त्वत्समानैश्वर्याय· ओ·१ सारूप्यं·

क्तिर्ज्ञानं वैराग्यं हरेस्तत्गुणकर्मानुवर्णनं च देवदैत्यस्थानानां विपर्यासः भागवतानां धर्मः आत्मानात्मविवेकादि च एतत्सर्वं ऽ
अस्मिन् आख्याने कातिम् यः एतां मृगेंद्रलीलां दैत्येंद्रवधं प्रह्लादचरितं च पठेत् सः वैकुंठं एति हे युधिष्ठिर यूयं नृलोके बत
भूरिभागाः यतः युष्मकं गृहान् ऋषय आयांति श्रीकृष्णश्च वसति एवं प्रह्लादो न यतः तस्य गृहे परब्रह्म न वसति तद्दर्शनार्थं-
मुनयः न अभियंति तन्यमातुलेयादि रूपेण कृष्णो न वर्तते न च तस्य स्वयं प्रसन्नः अतः ततोपि अस्मत्तोपि यूयं भूरिभागाः
किंच यस्य स्वरूपं भववेरिंच्यादिभिः इदमित्थमिति नोपवर्णितम् एवंभूतो भगवान् प्रसीदतां ननु दुष्करं त्रिपुरभेदादिकं
श्रीरुद्रः कृतवान् एवं भतः शिवोपि अस्य तत्त्वं न जानातीति कथं इत्यपेक्षायां भगवत्साहाय्यादेव असौ शिवप्रभावः न केवल
स्य इति वक्तुं आख्यानं उपक्षिपति हे राजन् पुरा मयेन विहतं रुद्रस्य यशः स भगवान् व्यतनोत् युधिष्ठिर उवा० अनेन कृ
ष्णो न रुद्रस्य कीर्तिः कस्मिन् कर्मणि वर्द्धिता नन्तत् कथ्यताम् नारद उवाच पुरा देवैः जिताः असुराः मयं शरणं ययुः सः हेमरौ
प्यमयीः तिस्रः पुरः निर्माय तेभ्यः ददौ ताभिः ते सेश्वरान् लोकान् अबाधंत तदा देवाद्याः रुद्रं शरणं ययुः ततः रुद्रः माभैष्टेति
अभयं दत्त्वा पुरेषु अस्त्रं व्यमुंचत तदा दैत्याः बाणैर्मृताः संतः पेतुः तदा महायोगी मयः रसकूपे तान् अक्षिपत् ते अमृतरसस्पृ-
ष्टाः वज्रसाराः उत्तस्थुः तदा भग्नसंकल्पं शिवं वीक्ष्य अयं भगवान् उपायं अकरोत् तदा ब्रह्मा वत्सः आसीत् अयं विष्णुः गौर्भू-
त्वा त्रिपुरं प्रविश्य कूपगामृतं पपौ ते असुराः पश्यंतोपि मोहिताः संतः न न्यषेधन् अथ असौ कृष्णः शंभोः संग्रामसाधनं रथसूत
ध्वजादि व्यधात् ततः रुद्रः सन्नद्धः सन् रथं आस्थाय अभिजिन्मुहूर्ते शरं मुमोच तेन तिस्रः पुरः ददाह तदा दिवि दुंदुभयो नेदुः
पुष्पवृष्टिः पपात गंधर्वादयः ननृतुः जगुश्च एवं शिरः पुरत्रयं दग्ध्वा ब्रह्मादिभिः स्तुतः सन् स्वधाम ययौ एवं रुद्रयशः व्यतनोत्

एवंकृष्णवीर्याणिजगत्पवित्राणिबहूनिसंति अपरंकिंवदामि ६९ इतिसप्तमेदशमः१० श्रीशुकउवाच युधिष्ठिरःदै-
त्यपतेः नृसिंहस्यच आख्यानंश्रुत्वामुदायुतःपुनर्नारदंपप्रच्छ युधिष्ठिरउवाच हेनारदनृणांवर्णाश्रमाचारयुतंधर्मंश्रोतु-
मिच्छामि यदाचरणेनपुमान्ज्ञानंभक्तिंचविंदति नारदउवाच हेधर्मभगवतेनत्वानारायणमुखात्श्रुतंधर्मंवक्ष्ये येनआ
त्माप्रसीदति सत्यं१ शौचं२ दया३ तपः४ तितिक्षा५ ईक्षानामयुक्तायुक्तविवेकः६ शमः७ दमः८ अहिंसा९ ब्रह्मचर्यं१० दानं११
स्वाध्यायः१२ संतोषः१३ आर्जवं१४ महत्सेवा१५ प्रवृत्तकर्मनिवृत्तिः१६ निष्फलक्रियाणांईक्षणं१७ मौनम्१८ आत्मविमर्शनम्
१९ अन्नाद्यादेः संविभागः२० भूतेषुआत्मदेवताबुद्धिः२१ श्रवणादिभक्तिभेदाः९=३० अयंत्रिंशल्लक्षणवान् सर्वेषांपरोधर्मः क
थितः द्विजानांलक्षणंआह गर्भाधानादिसंस्काराः यस्मिन् अविच्छिन्नाः सःद्विजः तदितरः शूद्रः द्विजन्मनांइज्याध्ययनदानानि
विहितानि शूद्रस्यतुवर्णधर्माएव विप्रस्यअध्ययनादिषट्कर्माणिविहितानि तत्रतुअध्यापनं याजनं शुद्धप्रतिग्रहश्चजीवि
काक्षत्रियस्य आपदियाजनमध्यापनंच अनापदितुखड्गवृत्तिः वैश्यस्यतुवार्तावृत्तिः शूद्रस्यद्विजानांशुश्रूषाविहिता विप्र
स्यमुख्यवृत्तिमाह कृष्यादिः अयाचितं प्रत्यहं धान्ययाञ्चा शिलोंछनम् इयंउत्तरोत्तराउत्तमा किंच नीचः अनापदिराजन्यं
विनाउत्तमांवृत्तिंनभजेत् आपत्सुसर्वेषामपिसर्वशः अथापि श्ववृत्यातुकथंचननजीवेत शमोदमोधृतिस्तेज स्त्याग आत्मज
यः क्षमा ब्रह्मण्यता प्रसादः रक्षाच ब्राह्मक्षलक्षणानि शौर्यंवीर्यंतपः शौचंसंतोषः क्षांतिरार्जवम् ज्ञानंदयाच्युतात्मत्वंसत्यं
चक्षात्रलक्षणानि देवादिषुभक्तिः त्रिवर्गपोषणं आस्तिक्यं उद्यमः वैश्यलक्षणं सेवादिशूद्रलक्षणं स्त्रीणांधर्मः पतिसेवादि
तद्बंधुषु अनुवृत्तिश्च किंच गृहसंमार्जनादिभिः उच्चावचैः कामैः प्रियवाक्यैः यास्त्रीपतिंहरिभावेनभजते सावैकुंठेपत्यास

हश्रीरिवमोदले संकरजातीनां अंत्यजादीनां च तत्तत्कुलकृता वृत्तिः हे राजन् अयं नृणां धर्मः इह परत्र च वेददृग्भिः सुखहेतुः स्मृ
तः ३५ इतिसप्तमे एकादशः ११ नारद उवाच ब्रह्मचारी गुरुकुले वसन् दांतः गुरोर्हितं आचरेत् सायंप्रातः गुर्वग्न्यर्क
सुरोत्तमान् उपासीत गायत्रीं जपन् संध्यात्रयं उपासीत सायंप्रातः संध्यानिमित्तं मौनं कुर्यात् गुरुणा आहूतश्चेत् छंदांसि
अधीयीत आदौ अंते च तच्चरणौ नमेत् पवित्रपाणिः सन् मेखलाजिनवासांसि जटादंडकमंडलून् उपवीतं च बिभृयात् सायं
प्रात भैक्ष्यं चरेत् तद्गुरवे निवेदयेत् तेनानुज्ञातश्चेत् भुंजीत नो चेत् उपवसेत् जितेंद्रियः सन् स्त्रीषु स्त्रीनिर्जितेषु च यावदर्थं
व्यवहरेत् प्रमदागाथां च त्यजेत् केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकं युवा सन् युवतीभिः गुरुस्त्रीभिः न कारयेत् नन्वग्निः
प्रमदा नाम घृतकुंभसमः पुमान् अतः स्नुतामपि रहो जह्यात् एतत्सर्वं गृहस्थस्य यतेरपि उक्तं एवं वेदशास्त्रादीन् अधीत्य गु
रवे दक्षिणां दत्वा गृहं वनं वा प्रविशेत् प्रव्रजेत्तत्र वा वसेत् एवंविधो ब्रह्मचारी वानप्रस्थो यतिर्गृही चरन्विंदति विज्ञानं परं ब्र
ह्माधिगच्छति अथ वानप्रस्थस्य नियमान् वक्ष्यामि यान् आतिष्ठन् ऋषिलोकं एति कृष्टपच्यं नाश्नीयात् अग्निपक्वं आमं
वा अर्कपक्वं वा अश्नीयात् वन्यैः धान्यैः चरुपुरोडाशान् निर्वपेत् नवे अन्नाद्ये प्राप्ते जीर्णं त्यजेत् अग्निसेवार्थं उटजं गुहां वाश्र
येत स्वयं हिमवाय्वग्निवर्षार्कातपान् सहेत केशरोमनखश्मश्रुमलानि जटिलो दधत् कमंडल्वजिने दंडवल्कलाग्निपरि-
च्छदान् एवं द्वादशाब्दान् अष्टौ चतुरः द्वौ एकं वा मुनिः वने चरेत् यदा व्याधिभिः जरया वा स्वक्रियायां असमर्थः तदा अनश-
नादिकं कुर्यात् किंच आत्मनि अग्नीन् समारोप्य अहंममतां त्यक्त्वा देहं आकाशादिषु भूतेषु इंद्रियाणि च देवतासु विलाप्य
आत्मानं चिन्मात्रं अवशिष्टं ज्ञात्वा अद्वयः सन् विरमेत् ३१ इतिसप्तमे द्वादशः १२ नारद उवाच ज्ञानाभ्यासे कल्पश्चे

त्वं तर्हि सन्यासं गृहीत्वा देहमात्रावशेषितः निरपेक्षः सन् महीं चरेत् असौ वासः यदि बिभृयात् तर्हि कौपीनाच्छादनं बिभृयात्
दंडपात्राभ्यां विनान्यत् अन्यत् अनापदि न धारयेत् भिक्षुः एक एव चरेत् देहस्य जीवनं मरणं वा नाभिनंदेत् कालं प्रतीक्षेत आ
त्मनि विश्वं पश्येत् आत्मानं परं ब्रह्म पश्येत् बंधं मोक्षं च मायामात्रं पश्येत् असच्छास्त्रेषु न सज्जेत वितंडादिवादान् त्यजेत् कं
चन पक्षं न संश्रयेत् बहून् ग्रंथान् नाभ्यसेत् मठादिव्यापारान् न कुर्यात् अव्यक्तलिंगः सन् मत्तवत् बालवत् कविरपि मूकवत्
आत्मानं नृणां दर्शयेत् अथ परमहंसधर्ममेवेतिहासेन स्फुटयति अत्राप्युदाहरंतीममितिहासं पुरातनम् प्रह्लादस्य च संवादं
मुनेराजगरस्य च एकदा प्रह्लादः कतिपयैः अमात्यैः वृतः लोकतत्वविवित्सया विचरन् सन् कावेर्याः सह्यशिखरे शयानं निगूढा
मलतेजसं मुनिं दृष्ट्वा यं कर्मणा आकृतिलिंगवर्णाश्रमादिभिः जनाः न विदुः तं मुनिं नत्वा जिज्ञासुः प्रह्लादः इदं प्रपच्छ हे ब्रह्मन् सोद्य-
मः पुमान् यथा पुष्टं देहं बिभर्ति तथा त्वमपि तत्र हेतुं वद उद्यमवतां वित्तं तद्वतां भोगः भोगिनां देहः पीवा भवति अन्यथा न अतः हे ब्रह्म
न् निरुद्यमस्य तव देहः पीवा कथं एतत् योग्यं चेत् वद ब्राह्मण उवाच हे असुरश्रेष्ठ त्वं प्रवृत्तिनिवृत्त्योः फलानि ज्ञानचक्षुषा
वेद यतः यस्य नारायणः हृद्गतः सन् अज्ञानं धुनोति ध्वांतं अर्क इव अथापि हे दैत्य तव प्रश्नान् ब्रूमहे अहं नानायोनिषु भ्रमन् इ
मं मनुष्यदेहं स्वर्गापवर्गयोः द्वारं प्रापितः तत्रापि सुखाय दुःखनिवृत्त्यै च कर्म कुर्वतां दंपतीनां विपर्ययं दृष्ट्वा निवृत्तोस्मि भो-
गान् अशाश्वतान् दृष्ट्वा निरुद्यमोस्मि एवं आत्मनः स्वार्थं अविद्वान् पुमान् संसारं प्राप्नोति किंच भयात् अलब्धनिद्राणां ध
निनां क्लेशं राजचोरादिभ्यः नित्यं भयं च पश्यामि नृणां शोकमोहभयक्रोधादयः अर्थमूलाः स्युः अतो बुधः अर्थस्पृहां त्यजेत् अ ११
त्र लोके नः मधुकरमहासर्पौ द्वौ गुरू उत्तमौ वयं ययोः शिक्षया वैराग्यं परितोषं च प्राप्ताः क्वचित् अल्पं भूरि प्राप्तं अन्नं भुंजे क्वचित्

ओ·१ गुह्यं आच्छादयते यावता तावन्मात्रम्·

क्षौमंदुकूलं अजिनंचीरं वल्कलंवापरिदधे क्वचित् धरायां क्वचित् प्रासादपर्यंकेशये क्वचित् अलंकृतःपरेच्छया रथे भाम्वैः चरे
स्वभावविषमंजनं अहंननिंदेनच स्तौमि सर्वेषांश्रेयः आशासे एवंमयासुगुप्तमपिस्वात्मवृत्तंतुभ्यंवर्णितम् यतः भवान् भगवत्प्र
रः नारदउवाच असुरेश्वरःमुनेः पारमहंस्यंधर्मंश्रुत्वातंपूजयित्वा आज्ञांगृहीत्वागृहंययौ ४६ इतिसप्तमेत्रयोदशः १३
युधिष्ठिरउवा० हेदेवर्षेगृहस्थःयेनविधिनान्यासिनांएतांपदवींयानितंविधिंब्रूहि नारदउवाच गृहेषुएवस्थितः गृ-
होचिताःक्रियाःवासुदेवार्पणंयथातथाकुर्वन् मुनीन् उपासीत भगवतः अवतारकथामृतंशृण्वन् सत्संगात् आत्मजायात्मजा
दिषु संगंत्यजेत् गृहादिषुविरक्तःअनुरक्तवानिवस्थित्वा यावतादेहादिभरणंतावत्स्वीकुर्यात् अधिकंयोभिमन्येत सस्तेनो
दंडमर्हति मृगादीन् प्राणिनः आत्मनः पुत्रवत्पश्येत् त्रिवर्गंअति कृच्छ्रेणनसेवेत आश्वचांडालादिभ्यः स्वभोज्यात् विभज्यद-
द्यात् एकामपिस्वस्त्रियं अतिथिसेवनेयुंजीत यस्यांनृणांस्वत्वंग्रहः यन्निमित्तंस्वप्राणान् जह्यात्पितरंगुरुंहन्यात् तस्यांस्त्रि-
यांयःस्वत्वंत्यजेत् तेनअजितोजित एव प्राज्ञःपंचयज्ञशेषैःअन्नादिभिः स्ववृत्तिंकल्पयेत् शेषे स्वत्वंत्यजन् महतांपदवींइयात्
स्ववृत्त्याप्राप्तवित्तेन अन्वहंदेवादीन् यजेत् यदास्वस्ययज्ञसंपदःस्युः तदा अग्निहोत्रादिना यजेत् किंच विप्रमुखेहुतैः यथा भग
वान् इज्येत तथा अग्नौन अतः ब्राह्मणादिषु अंतर्यामिणंयजस्वद्विजःभाद्रेआपरपक्षिकंश्राद्धंकुर्यात् अयनविषुवव्यतीपात
दिनक्षयचंद्रसूर्यग्रहेषु अक्षय्यतृतीयायां कार्तिकसितनवम्यांअष्टकासुमाघसितसप्तम्यांच श्राद्धादिकुर्यात् एते कालाः नृणां
श्रेयोविवर्द्धनाः एषुश्रेयःकुर्यात् तदेव आयुषः साफल्यम् किंच एषुयत्कृतंदानहोमजपादितत् अक्षय्यंभवति अथपुण्यदेशान्-
वक्ष्यामि सर्वेपुण्यतमोदेशः सत्पात्रं यत्रलभ्यते किंच यत्र हरेःअर्चागंगाद्याःनद्यश्चसःदेशः श्रेयसांपदम् यत्रपुष्करादीनिसरां
ओ०६ ईश्वरः

सि तथा कुरुक्षेत्र गया प्रयाग पुलहाश्रम नैमिष प्रभास कुशस्थली वाराणसी मथुरा पंपा बिंदुसरो नारायणाश्रम नंदा सीतारामाश्र-
मादयः सर्वे कुलाचलाः महेंद्र मलयादयः एते यत्र संति ते पुण्यतमाः देशाः पुण्येच्छुः एतान् सेवेत हे राजन् सर्वेषु हरिरेव एकं पात्रम् अ
च्युतेज्यासर्वेषां तर्पणं भवति भगवान् तिर्यगादिपूर्षु अंतर्यामितया शेते अतः पुरुष इति प्रसिद्धः सर्वेषु प्राणिषु भगवान् तारत-
म्येन वर्तते अतः पुरुषः सत्पात्रं तत्रापि ब्राह्मणं सुपात्रं विदुः यतः तप आदिना सः हरेस्तनुं वेदं धत्ते एवं भूताः द्विजाः पादरज सा-
त्रिलोकीं पुनंतः एते कृष्णस्य महद्दैवतम् ४२ इति सप्तमे चतुर्दशः १४ नारद उवाच केचिद्द्विजाः कर्मनिष्ठाः अपरे तपोनि
ष्ठाः स्वाध्यायेन ये प्रवचने ये केचित् ज्ञानयोगमाः तत्र कव्यानि ज्ञाननिष्ठाय देयानि तथा हव्यान्यपि द्वौ देवे पितृकार्ये त्रीन् एकैक
मुभयत्र वा भोजयेत् सुसमृद्धोपि श्राद्धे कुर्यान्न विस्तरम् देशे काले च प्राप्ते हरेः अर्पणेन अन्नं विभजन् सर्वं ईश्वररूपं पश्येत्
किंच धर्मज्ञः श्राद्धे आमिषं न दद्यात् स्वयं च नाद्यात् यथा मुन्यन्नैः हरेः प्रीतिः स्यात् तथा पशुहिंसया न किंच नृणां भूतहिंसात्या
गसदृशः अन्यो धर्मो नास्ति अतः ज्ञानिनः मनोनियम्य कर्ममयान् यज्ञान् त्यजंति किंच द्रव्ययज्ञैर्यक्ष्यमाणं नरं दृष्ट्वा भूतानि-
बिभ्यति अतः दैवप्राप्तेन मुन्यन्नेन तुष्टः सन् नित्यनैमित्तिकाः क्रियाः कुर्यात् किंच धर्मः १ परधर्मः २ आभासः ३ उपधर्मः ४ छलः
इमाः अधर्मशाखाः धर्मज्ञः त्यजेत् आसां अर्थमाह धर्मबाधः १ अन्यस्योक्तः २ इच्छया कृतः ३ पाखंडः ४ शब्दभेदः ५ किंच स्वयं
अधनः धर्मार्थं यात्रार्थं वा धनं नापेक्षेत निरिच्छस्य निरीहा महाहिरिव वृत्तिदा भवति संतुष्टस्य यत् सुखं न तत् लोभेन धावतः
कुतः सदा संतुष्टमनसः सर्वाः दिशाः सुखदाः यथा शर्करा कंटकादिभ्यः उपानहत्पदः शिवं असंतुष्टस्य विप्रस्य तेजो विद्यादयः इं- १२
द्रियलौल्येन स्रवंति जनः क्षुत्तृड्भ्यां कामस्य अंतं याति क्रोधफलेन क्रोधस्यापि अंतं याति तथापि दिशो जिता भुवं भुक्त्वा लोभ

ओ·७ अरण्यत्रीत्यादिभिः ओ·४ दंभोवा·

स्य अंतंनयाति अथकामादिजयोपायानाह असंकल्पात् कामंजयेत् कामत्यागात् क्रोधं अर्थे अनर्थदर्शनेन लोभं एवंभय-
शोकमोहादीन् जयेत् सत्वेन रजः तमश्च सत्वनिषेवयानिद्राम् उपशमेन सत्वम् एतत्सर्वंगुरौ भक्त्या पुरुषोजयेत् ज्ञानप्रदेगु
रौ यस्यमनुष्य इतिबुद्धिः तस्यशास्त्रश्रवणंव्यर्थं एवं कामादि वेगांजित्वाध्यानपरोभवेत् यःचित्तजये यत्तः सःनिःसंगोभूत्वा
शुचौदेशे आसनंसंस्थाप्य तत्रोपविश्य ॐ मित्युच्चारयन् पूरकुंभकरेचकैः प्राणापानौ सन्निरुध्यात् स्वनासाग्रनिरीक्षणः
किंच यत्रयत्रमनोगच्छति ततः ततः आहृत्यहृदिरुंध्यात् एवंअभ्यसतः यतेःचित्तंशांतिंयाति यःयतिःपुनः धर्मादीन् सेव
तेसःवांताशीज्ञेयः गृहस्थस्यक्रियात्यागः व्रतत्यागोबटोरपि तपस्विनोग्रामसेवाभिक्षोरिंद्रियलौल्यता १ एते आश्रमवि
डंबकाः अतःसदातत्वज्ञाने यतितव्यम् अथनृदेहस्यरूपकमाह शरीरंरथंआहुः इंद्रियाणि[illegible] बुद्धिंसारथिम् मनःरश्मी
न् धर्माधर्मौचक्रे साहंकारंजीवंरथिनम् प्रणवंधनुः शुद्धंजीवंशरम् परब्रह्मलक्ष्यम् यथाधनुषाशरोलक्ष्येनिपात्यते तथा
प्रणवेनजीवः ब्रह्मणिनिपात्य रागद्वेषादयः जेतव्याः एवंनृकायरूपंरथंपुमान् यावत् धत्ते तावदेवमहत्सेवयाज्ञानासिंदध-
त् भगवदाश्रयः सन् जि[illegible]शत्रुः स्वानंदतुष्टोभूत्वाइदंरथादिकंउपेक्षेत अन्यथा एते एव असदिंद्रियवाजिसूताः प्रमत्तंजनं
प्रवृत्तिमार्गंनीत्वावि[illegible]दस्युषु क्षिपंति तेदस्यवः एनंसरथंसंसारकूपेक्षिपंति एवंप्रवृत्तिमार्गेणसंसारम् निवृत्तिमार्गेण
अमृतंअश्नुते किं[illegible]कारणवस्त्वैक्यदर्शनंपटतंतुवत् भावाद्वैतम् १ परेब्रह्मणि सर्वकर्मार्पणंक्रियाद्वैतम् २ आत्मनः
जायापुत्रादिसर्व[illegible]च अर्थकामयोर्यत् ऐक्यंद्रव्याद्वैतम् ३ एतत्त्रयंस्वानुभूत्या यःजानाति सःमुनिः त्रीन्जाग्रदादीन्

ओ॰२ त्वस्य, ओ[illegible]पंचमहाभूतात्मकत्वेन भोक्तुश्च परमात्मत्वेनाभेदालोचनेनार्थकामयोर्यदैक्यदर्शनम् ।

सि तथाकुरुक्षेत्रगयाप्रयागपुलहाश्रमनैमिषप्रभासकुशस्थलीवाराणसीमथुरापंपाबिंदुसरोनारायणाश्रमनंदासीतारामाश्र-
मादयः सर्वेकुलाचलाःमहेंद्रमलयादयः एतेयत्रसंति तेपुण्यतमाःदेशाः पुण्येच्छुः एतान् सेवेत हे राजन् सर्वेषुहरिरेव एकंपात्रम् अ
च्युतेज्यासर्वेषांतर्पणंभवति भगवान्तिर्यगादिपूर्षु अंतर्यामितयाशेते अतः पुरुषइतिप्रसिद्धः सर्वेषुप्राणिषु भगवान्तारत-
म्येनवर्तते अतःपुरुषःसत्पात्रं तत्रापिब्राह्मणंसुपात्रंविदुः यतः तपआदिनासः हरेस्तनुं वेदंधत्ते एवंभूताःद्विजाःपादरजसा-
त्रिलोकींपुनंतः एतेकृष्णस्यमहद्दैवतम् ४२ इतिसप्तमेचतुर्दशः१४ नारदउवाच केचिद्विजाःकर्मनिष्ठाःअपरेतपोनि
ष्ठाःस्वाध्यायेनयेप्रवचने येकेचित् ज्ञानयोगमाः तत्रकव्यानिज्ञाननिष्ठायदेयानि तथाहव्यान्यपि द्वौदेवे पितृकार्येत्रीन् एकैक
मुभयत्रवा भोजयेत् सुसमृद्धोपिश्राद्धेकुर्यान्नविस्तरम् देशेकालेचप्राप्तेहरेः अर्पणेनअन्नंविभजन् सर्वईश्वररूपंपश्येत्
किंच धर्मज्ञः श्राद्धे आमिषंनदद्यात् स्वयंचनाद्यात् यथामुन्यन्नैः हरेःप्रीतिःस्यात् तथापशुहिंसयान किंच नृणांभूतहिंसात्या
गसदृशः अन्योधर्मोनास्ति अतः ज्ञानिनः मनोनियम्यंकर्मभयान् यज्ञान् त्यजंति किंच द्रव्ययज्ञैर्यक्ष्यमाणंनरंदृष्ट्वाभूतानि-
बिभ्यति अतः दैवप्रासेनमुन्यन्नेनतुष्टःसन् नित्यनैमित्तिकाःक्रियाःकुर्यात् किंच धर्मः१परधर्मः२ आभासः३ उपधर्मः४ छलः
इमाः अधर्मशाखाः धर्मज्ञःत्यजेत् आसांअर्थमाह धर्मबाधः१ अन्यस्योक्तः२ इच्छयाकृतः३ पाखंडः४ शब्दभेदः५ किंच स्वयं
अधनः धर्मार्थेयात्रार्थेवा धनंनापेक्षेत निरिच्छस्यनिरीहामहाहिरिववृत्तिदाभवति संतुष्टस्ययत्सुखं नतत्लोभेनधावतः
कुतःसदासंतुष्टमनसःसर्वाःदिशाःसुखदाः यथाशर्कराकंटकादिभ्यःउपानहत्पदःशिवं असंतुष्टस्यविप्रस्यतेजोविद्यादयः इं- १२
द्रियलौल्येनस्रवंति जनःक्षुत्तृड्भ्यांकामस्यअंतंयाति क्रोधफलेनक्रोधस्यापि अंतंयाति तथापिदिशोजित्वाभुवंभुक्त्वालोभ

ओ.७ अरण्यब्रीह्यादिभिः; ओ.४ दंभोवा.

स्य अंतंनयाति अथकामादिजयोपायानाह असंकल्पात् कामंजयेत् कामत्यागात् क्रोधं अर्थे अनर्थदर्शनेन लोभं एवंभय-
शोकमोहादीन् जयेत् सत्वेनरजः तमश्च सत्वनिषेवयानिद्राम् उपशमेन सत्वम् एतत्सर्वंगुरौ भक्त्यापुरुषोजयेत् ज्ञानप्रदेगु
रौ यस्यमनुष्य इतिबुद्धिः तस्यशास्त्रश्रवणंव्यर्थं एवं कामादिवेगांजित्वाध्यानपरोभवेत् यःचित्तजये यत्तः सःनिःसंगोभृत्वा
शुचौदेशेआसनंसंस्थाप्य तत्रोपविश्य ॐ मित्युच्चारयन् पूरकुंभकरेचकैः प्राणापानौसन्निरुध्यात् स्वनासाग्रनिरीक्षणः
किंच यत्रयत्रमनोगच्छति ततः ततः आहृत्यहृदिरुंध्यात् एवंअभ्यसतः यतेःचित्तं शांतिंयाति यःयतिःपुनः धर्मादीन् सेव
तेसः वांताशीज्ञेयः गृहस्थस्यक्रियात्यागः व्रतत्यागोबटोरपि तपस्विनोग्रामसेवाभिक्षोरिंद्रियलौल्यता १ एतेआश्रमवि
डंबकाः अतः सदातत्वज्ञाने यतितव्यम् अथनृदेहस्यरूपकमाह शरीरंरथंआहुः इंद्रियाणिहयान् बुद्धिंसारथिम् मनःरश्मी
न् धर्माधर्मौचक्रे साहंकारंजीवंरथिनम् प्रणवंधनुः शुद्धंजीवं शरम् परब्रह्मलक्ष्यम् यथाधनुषाशरोलक्ष्येनिपात्यते तथा
प्रणवेनजीवः ब्रह्मणिनिपात्य रागद्वेषादयः जेतव्याः एवंनृकायरूपंरथंपुमान् यावत् धत्ते तावदेवमहत्सेवयाज्ञानासिंदध-
त् भगवदाश्रयः सन् जि[illegible]शत्रुः स्वानंदतुष्टोभूत्वाइदंरथादिकंउपेक्षेत अन्यथा एतेएव असदिंद्रियवाजिसूताः प्रमत्तंजनं
प्रवृत्तिमार्गेनीत्वावि[illegible]दस्युषु क्षिपंतितेदस्यवः एनंसरथंसंसारकूपेक्षिपंति एवंप्रवृत्तिमार्गेणसंसारम् निवृत्तिमार्गेण
अमृतंअश्नुते किंच [illegible] कारणवस्त्वैक्यदर्शनं पटतंतुवत् भावाद्वैतम् १ परेब्रह्मणि सर्वकर्मार्पणंक्रियाद्वैतम् २ आत्मनः
जायापुत्रादिसर्व[illegible]च अर्थकामयोर्यत् ऐक्यं द्रव्याद्वैतम् ३ एतत्त्रयंस्वानुभूत्यायःजानातिसः मुनिः त्रीन् जाग्रदादीन्

ओ॰ २ स्वस्य, ओ[illegible] पंचमहाभूतात्मकत्वेन भोक्तुश्च परमात्मत्वेनाभेदालोचनेनार्थकामयोर्यदैक्यदर्शनम्॰

धुनोति एतैरुरगयाप्रयागैः कर्मभिर्वर्तमानः गृहेपिकृष्णस्य गतिंयायात् हेनृपयूयंगृहेवर्तमानाः संतः श्रीकृष्णादेवआपद्गणा
त् अतरत अतः सःमहेंद्रभगवत्सेवामहतांअवज्ञया भ्रश्यति तत् कृपयासिद्ध्यति तत्स्वोदाहरणेनदर्शयति हेधर्मपुराअहं
गतकल्पेउपबर्हणांमर्वागंधर्वः आसम् एकदादेवसत्रेगंधर्वादयः हरिगाथागायनेविश्वसृग्भिः आहूताः तत्र अहंस्त्रीभिर्वृतः
सन् गतः तदामदपरासत्सात्वाविश्वसृजः शूद्रोभवेतिशेपुः तावदहंदास्यांजज्ञे तत्रब्रह्मवादिनांसेवयाब्रह्मपुत्रतांप्राप्तः हेरा
जन् एवंग्रहमेधीयोधर्मः तेउक्तः येनन्यासिनांपदवींइयात् यूयंनृलोकेबत भूरिभागाः यतः युष्माकंगृहेषुनराकारंश्रीकृष्णा
ख्यंब्रह्मसाक्षाद्वसति तद्दर्शनार्थंमुनयः सर्वतः आयांति किंच सोऽयंब्रह्मैवयुष्माकंप्रियः सुहृन्मातुलेयइत्यादिरूपोभव-
ति यस्यरूपंशिवादिभिरपिइदमित्थमितिसाक्षान्नोपवर्णितंसः युष्माकंस्वयमेवप्रसन्नः एवंभूतः भगवान्मेप्रसीदताम्

श्रीशुकउवाच एवंदेवर्षिणाप्रोक्तंनिशम्यप्रीतः धर्मराजः कृष्णंनारदंचपूजयामास पूजितोमुनिः कृष्णपार्थौआ
मंत्र्यययौ पार्थः कृष्णंपरंब्रह्मश्रुत्वाविस्मितः आसीत एवंतेदक्षकन्यानांवंशाः कीर्तिताः यत्रदेवासुरमनुष्याद्याः चराचराः अ-
भवन् इतिसप्तमस्कंधेचूर्णिकायांपंचदशोऽध्यायः१५ श्रीकृष्णार्पणमस्तु ॐ शुभंभवतु ॐ